दिनाङ्क : 01/08/2026 सायम् - 06:20

मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्र-मोदी आन्ध्रप्रदेशस्य भोगापुरम-स्थले अल्लूरि-सीताराम-राजू-अन्ताराष्ट्रिय-विमानपत्तनस्य उद्घाटनम् अकरोत् अथ च आधारभूत-संरचना-ऊर्जा-क्षेत्रयोः अष्टादश-सहस्रकोटि-रूप्यकाणाम् प्रकल्पाः अपि शुभारम्भिताः।
- नाथूला-द्वारस्य माध्यमेन भारत-चीनयोः मध्ये सीमापार-व्यापारः पुनः प्रारब्धः।
- राष्ट्रिय-सुरक्षा-परामर्शकः अजीत-डोवालः लोकमान्य-तिलक- राष्ट्रिय-पुरस्कारेण सभाजितः।
- ग्लासगो-नगरे आयोजिते राष्ट्रमण्डल-क्रीडोत्सवे महिलानां चतुःपञ्चाशत्-सप्तपञ्चाशत्-किलोग्रामवर्गयोः जैस्मिन-लम्बोरिया, प्रीति-पवार इत्येताभ्यां स्वर्णपदकं विजितम्।
- ताइपे-ओपन-बैडमिन्टन-प्रतियोगितायाः चरम-स्पर्धायां प्रविष्टा भारतस्य सप्तदश-वर्षीया क्रीडिका तन्वी शर्मा।

## प्रधानमन्त्री-आन्ध्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रावोचत् यत् आन्ध्रप्रदेशः द्रुतगत्या अग्रे सरति सहैव केन्द्रसर्वकारः विशाल-स्तरीय-आधारभूत-संरचनायाः औद्योगिकी-विकासस्य च माध्यमेन स्वर्ण-आन्ध्रस्य अथ विकसित-भारतस्य सङ्कल्पं पूरयितुम् पूर्णतः कटिबद्धो वर्तते।विजयनगरम-जनपदस्य भोगपुरम-स्थले अल्लूरि-सीताराम-राजू-अन्ताराष्ट्रिय-विमानपत्तनस्य उद्घाटनोत्तरं जनसभां सम्बोधयन् प्रधानमन्त्री न्यगादीत् यत् विमानपत्तन-मार्गोर्जा-क्षेत्राणि समेत्य अष्टादश-सहस्रकोटि-रूप्यकाणाम् विकास-परियोजनाः केन्द्र-राज्ययोः एन.डी.ए-सर्वकारस्य नेतृत्वे राज्यस्य द्रुतगत्या जायमानां प्रगतिं प्रदर्शयति ।

प्रधानमन्त्रिणा एतत् नवीन-विमानपत्तनम् आन्ध्रप्रदेशस्य, विशेषतः उत्तरान्ध्र-क्षेत्रस्य प्रगतेः धावनमार्गः सहैन राज्यस्य यूनाम् आकाङ्क्षाणां क्षेपण-मञ्चः इति प्रतिपादितम्। सः अघोषयत् यत् अस्य विमानपत्तनस्य नामकरणम् स्वतन्त्रता-सेनानिनः अल्लूरि-सीताराम-राजू-वर्यस्य नाम्ना कृतम्, यत् आगामि-वंशाय देशभक्तेः समाजसेवायाः च प्रेरणां प्रदास्यति।

अत्रावसरे केन्द्रीय-नागरिक-विमानन-मन्त्री के.राममोहन-नाइडुः एतस्य विमानपत्तनस्य उद्घाटनं ऐतिहासिक-कीर्तिमानत्वेन व्यपादिशत्। सहैव तेनोक्तं यत् विमानपत्तनमिदं उत्तर-आन्ध्र-क्षेत्रं विकासस्य, निवेशस्य, उद्यमस्य च मुख्य-द्वारत्वेन परिवर्तयिष्यति।

## प्रधानमन्त्री-विवेकानन्द

प्रधानमन्त्री नरेन्द्रमोदी अद्य सायं मैसुरुनगरे स्वामी-विवेकानन्द-सांस्कृतिक-युव-केन्द्रस्य विवेक-स्मारकस्य उद्घाटनम् अकरोत्। एतत् स्मारकं द्विनवत्यधिक-अष्टादशशततमस्य स्वामी-विवेकानन्दस्य मैसुरु-नगरीय ऐतिहासिक-प्रवासस्य स्मृतिं सञ्जीवयति। तस्मिन् काले सः मैसुरु-राज्यस्य दिवान-पदभूषितं सर के. शेषाद्रि-अय्यर् इत्यमुना सह अमिलत् सहैव शिकागो-नगरे आयोजितायां विश्व-धर्म-संसदि भाग-ग्रहणाय अमेरीका-यात्रायै मैसुरु-महाराज्ञः श्री-चामराजेन्द्र-वोडियार-वर्यात् वित्तीय-साहाय्यम् अलभत। अवसरेऽस्मिन् जनसभां सम्बोधयन् प्रधानमन्त्री मोदी अवदत् यत् स्वामीविवेकानन्दः वस्तुतः भारतस्य भावनायाः प्रतीकभूतम् आसीत्। सः सबलं प्रोदीरितवान् यत् देशस्य युवानः वैश्विक-विकासं अग्रे वर्धयन्ति।

उद्घाटनावसरे प्रधानमन्त्रिणे विवेक-स्मारकस्य भ्रमणं कारितम्, यत्र सः स्वामी-विवेकानन्दस्य प्रतिम्नि पुष्पाञ्जलिं समर्पयत्। अनेनैव सह प्रधानमन्त्री स्मारक-प्राङ्गणे पादपारोपणमपि अकरोत्।

**भारतचीन-व्यापारः**

सिक्किम-राज्ये स्थितेन नाथूला-पास इति माध्यमेन भारत-चीनयोः मध्ये सीमापार-व्यापारः अद्य प्रातः पुनः प्रारब्धः। येन षड्-वर्षाधिकस्य स्थगनस्य अन्तोऽभवत्। अस्य व्यापारस्य पुनः प्रारम्भः भारत-चीनयोः द्विपक्षीय-सम्बन्धेषु कश्चन सकारात्मकः सङ्केतः वर्तते।

अस्माकं संवाददात्रा विज्ञापितं यत् अद्य प्रातः उभयोः देशयोः अधिकारिणः 'नो मैन्स लैंड'इति क्षेत्रे परस्परम् अमिलन्। चीन-पक्षस्य नेतृत्वं तिब्बत-स्वायत्त-क्षेत्रस्य प्रशासनिक-प्रमुखैः सहैव तस्य वाणिज्य-सीमा-व्यापार-विभागयोः प्रतिनिधिभिः कृतम्।

**अजीतडोवाल-पुरस्कारः**

राष्ट्रिय-सुरक्षा-परामर्शकः अजीत-डोवालः अद्य पुणे-नगरे आयोजिते एकस्मिन् समारोहे लोकमान्य-तिलक-राष्ट्रिय-पुरस्कारेण सभाजितः। लोकमान्य-तिलक-स्मारक-न्यासेन संस्थापितः एषः पुरस्कारः लोकमान्य-बाल-गङ्गाधर-तिलकवर्यस्य षडाधिक-शततमे पुण्यतिथ्यवसरे केन्द्रीय-गृहमन्त्रिणा अमित-शाहेन प्रदत्तः।

अत्रावसरे सम्बोधयन् अमितशाहः अवदत् यत् अजीत-डोवालः भारतस्य राष्ट्रिय-सुरक्षायाः सुदृढीकरणे असाधारणं योगदानम् व्याहृतवान्। सः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्र-मोदिनः नेतृत्वे राष्ट्रिय-सुरक्षा-सम्बद्धेषु प्रमुख-निर्णयेषु डोवालः मुख्य-भूमिकां निर्व्यूढवान्। सम्मान-ग्रहणावसरे अज्जीत-डोवालः अवदत् यत् एतेन समादरेण सः अतीव नम्रताम् अनुभवति। सः अवदत् यत् युवा-वंशेन लोकमान्य-तिलकस्य देशभक्तेः, त्यागस्य, कर्तव्यनिष्ठायाः च आदर्शाः आत्मसात् करणीयाः।

**जम्मूकश्मीर-आक्रमणम्**

जम्मू-कश्मीरस्थ कुलगाम-जनपदस्य केलमक्षेत्रे दुरापन्ने आतङ्काक्रमणे व्रणितः द्वितीय-श्रमिकः अद्य प्रातः चिकित्सालये मृत्युमुपगतः , येन मृतकानां सङ्ख्या द्वयं समभवत्। वरिष्ठाधिकारिणा विज्ञापितं यत् इतस्ततः अज्ञात-आतङ्कवादिभिः इष्टिका-यन्त्रागारे कार्यं कुर्वतोः द्वयोः श्रमिकयोः उपरि भुशुण्डिका-प्रहारः कृतः। घटनायाः पश्चादेव तत् क्षेत्रं अवरुध्य आतङ्कवादीनाम् अन्वेषणाय बृहत्-अभियानम् प्रवर्त्तितम्। उपराज्यपालः मनोज-सिन्हा मुख्यमन्त्री उमर-अब्दुल्ला च एतस्य नृशंस-हत्याकाण्डस्य तीव्र-गर्हणां अकुरुतां मृतानां परिवारिजनेभ्यः च संवेदनां प्रकटितवन्तौ। उपराज्यपालः सुरक्षाबलानि क्षेत्रे आतङ्कवादीनां निष्प्रभावीकरणाय अभियानानां तीव्रीकरणाय च समादिशत्। मुख्यमन्त्रिणा मृतकयोः परिजनेभ्यः मुख्यमन्त्री-रिलीफ-कोषतः दशलक्ष-रूप्यकाणां अनुग्रहराशेः घोषणा कृता, एतदतिरिच्य कुलगाम-जनपद-प्रशासनेन षट्लक्ष-रूप्यकाणां साहाय्यमपि प्रदास्यते।

**भारतीय-ऋतु-विभागेन**

भारतीय-ऋतु-विभागेन सम्भाव्यते यत् दक्षिण-पश्चिमात् आगच्छतः प्रावृषः उत्तरार्धे देशे अनावृष्टिः मन्द - वर्षणं वा भवेत्; अगस्त - मासे च वर्षणं ऊनमेव भविष्यति। पूर्वीय-भागेषु, उत्तर-पश्चिम-मध्य-भारते, पूर्वोत्तर-क्षेत्रेषु च वर्षा सामान्या स्थास्यति इति ऋतु-विज्ञान-विभागस्य स्पष्टीकरणम्।

एतत् अतिरिक्तञ्च, ऋतु-विज्ञान-विभागेन अनुमानितं यत् अगस्त-मासे देशस्य भूयिष्ठ-भागेषु उष्णता-मानं सामान्याद् अधिकमेव स्थास्यति।

**राष्ट्रमण्डल-क्रीडासु**

ग्लास्गो-नगरे आयोजितासु राष्ट्रमण्डल-क्रीडासु अद्य भारतस्य प्रीति-पवार जैस्मिन-लैम्बोरिया च स्व-स्व-अन्तिम-मुष्टियुद्धे 5-0 इति अङ्कान्तरेण विजयं प्राप्य स्वर्णपदकं विजितवत्यौ। अत्रान्तरे त्रि-कूर्दक-क्रीडासु भारतस्य प्रवीण-चित्रावेलेन रजतपदकं सेलवा-प्रभुना च कांस्यपदकं अवाप्तम्। एतेन भारतं साम्प्रतं 7 स्वर्ण-13 रजत-7 कांस्य-पदकैः सह आहत्य 27 पदकानि जित्वा तालिकायां षष्ठे स्थाने विराजते॥

**बैडमिन्टन-प्रतियोगितायाः**

ताइपे-ओपन-बैडमिन्टन-प्रतियोगितायाः चरम-स्पर्धायां प्रविष्टा भारतस्य सप्तदश-वर्षीया क्रीडिका तन्वी शर्मा।

चीन-ताइपे-क्रीडिकां पराजित्य अन्तिम-स्पर्धां प्राप्ता तन्वी शर्मा; श्वः वियतनाम-देशस्य थुई लिन्ह न्गुयेन् इत्यनया सह भविष्यति मुख्य-द्वन्द्वः ।

अपि च, अन्यस्यां उपान्त्य-स्पर्धायाम् भारतस्य उन्नति-हुड्डा वियतनाम-देशस्य थुई लिन्ह न्गुयेन् इत्यस्याः साम्मुख्ये 15-21, 19-21 इति चक्र-द्वये पराजयं प्राप्य स्पर्धातः बहिर्भूता।

**।। इति वार्ता: ।।**